॥ ओ३म् ॥
कुलीनमकुलीनं वा वीरं पुरुषमानिनम्।
चरित्रमेव व्याख्याति शुचिं वा यदि वाशुचिम् ॥
(वाल्मीकि रामायण अयो. का. - 109/4)

यो यथा वर्तते यस्मिन्
तस्मिन्नेव प्रवर्तयन्।
नाधर्मं समवाप्नोति
न चाश्रेयश्च विन्दति ॥
(महाभारत, उद्योग पर्व - 178/53)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

Posting Date.:
4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥
(भगवद्गीता-अध्याय 2, श्लोक 50)

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन ॥
(भगवद्गीता-अध्याय 6, श्लोक 2)

卐 वर्षम्-१४ 卐 अंकः-०२ (३१४) नवदेहली 卐 १६ जुलाईमासः २०२४तः ३१ जुलाईमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८

## तमिलनाडौ संस्कृत-प्राकृताध्ययनस्य एकविंशतिदिवसीया कार्यशाला सम्पन्ना

तिरुमलाई/तमिलनाडुः (डॉ.अजंयकुमारमिश्राः)। संमान्य धवलकीर्ति स्वामी, आचार्य श्री अकलंक शैक्षिक समितिः, अरिहन्तगिरिः ,तिरुमलै इत्येषाम् उपस्थितौ २१ दिवसीयायाः राष्ट्रिय प्राकृत कार्यशालायाः समापनोत्सवः समाचरितः। मुख्यातिथि रुपेण महामहिम रविन्द्र नारायण रविः ,राज्यपालः,तमिलनाडुः कथितवान् यद् वैदिकः जैन धर्मश्च भारतस्य मूलः प्राचीनतम धर्मः। केंद्रीय संस्कृत विश्वविद्यालय नई दिल्ल्याः कुलपतिः प्रो श्रीनिवास वरखेडी संस्कृत, प्राकृत पालि इत्येतां भाषात्रिवेणीं सम्बोधयन् उक्तवान् यद् तमिलनाडावपि संस्कृत-प्राकृत अध्ययनकेंद्रं शोध केन्द्रं च स्थापितं स्यात्।




महामहिम्नः रविन्द्र नारायण रवेः कार्यशालासमापन कार्यक्रमे अत्यंतं सौहार्द पूर्णम् आत्मीयं वैदुष्यपूर्ण सानिध्यम् अस्माभिः प्राप्तम्। इतिहासे दर्शने च तदीयविद्वता विशेषज्ञता अद्भुता , श्रवणीया अनुकरणीया

शेषभागःतृतीयेपुटे




## भरूआ-सॉल्यूशन्स - तत्वावधाने 'कॉरपोरेट ट्रेनिंग फॉर प्रोफेशनल डेवलपमेंट/कोर स्किल' इत्यस्मिन्विषये त्रिदिवसीया कार्यशाला सम्पन्ना

### आई.टी. क्षेत्रे पतंजलिः अधुना करिष्यति नूतनक्रान्तिम्-स्वामी रामदेवः

(हरिद्वारम्) पतंजलेः आई.टी. संस्थान भरूआ सॉल्यूशन्स इत्यस्य च तत्वाधाने पतंजलि विश्वविद्यालयस्थे सभागारे कार्यशालायाः समापने पतंजलि योगपीठ संस्थापकः अध्यक्षः स्वामी रामदेवः कथितवान् आई.



टी. क्षेत्रस्य सर्वासां समस्यानां समाधानं 'भरूआ' निहितम् । साम्प्रतमेव भरूआ विख्यात निधिभिः सममेव आई.टी. क्षेत्रे सहमतः जातः यत्, आई.टी. क्षेत्रे पतंजलि अधुना नूतन क्रांतिं करिष्यति। आचार्यः बालकृष्णः अकथयत् यत् पतंजलिः पूर्णविश्वस्मिन् योग- आयुर्वेद - संदर्भे जानाति। वयं भरूआ सॉल्यूशन्स रूपेण आई.टी. क्षेत्रे पादं स्थापितवन्तः। भरूआ एतादृशः आई.टी. निधिः अभवत् तस्य पूर्ण

शेषभागःतृतीयेपुटे

## भारतीयज्ञानपरम्परा संस्कृतं च परस्परं पूरकं वर्त्तते, सर्वविध ज्ञान-विज्ञानञ्च संस्कृते निहितम् अस्ति-प्रो पंकज चान्दे

डॉ.दिनेश चौबे, उज्जयिनी

मध्यप्रदेशसर्वकारस्य उच्चशिक्षाविभागः तथा च उज्जयिनीस्थस्य महर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयः इत्यनयोः संयुक्ततत्वावधाने द्विदिवसीया राष्ट्रियकार्यशाला आयोजिता आसीत् । भारतीयज्ञानपरम्परा संस्कृतं च (राष्ट्रियशिक्षानीतिः २०२०) परिपेक्ष्ये केन्द्रितायाः कार्यशालायाः उद्घाटनं ०२ जुलाई २०२४ तमे दिनाङ्के विश्वविद्यालयस्य श्रीकृष्णयोग भवने



प्रातः १०:३० वादने अभवत्। कार्यशालायामस्यां भागग्रहणाय देशस्य प्रख्याताः विषयविशेषज्ञविद्वांसः उज्जयिन्याम् आगताः आसन। विद्वतभिः पाठ्यक्रमस्य अद्यतनीकरणं च कृतम् । मुख्यातिथिरूपेण

शेषभागःद्वितीयेपुटे

# महर्षिपाणिनिसंस्कृत-महर्षिमहेशयोगिविश्वविद्यालयोः मध्ये अनुबन्धः सञ्जातः

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयः, एवञ्च कटनीस्थ महर्षिमहेशयोगिवैदिक विश्वविद्यालयोः मध्ये शैक्षिकानुबंधः (उवन) सञ्जातः। उभौ विश्वविद्यालयोः मध्ये 11 जुलाई



2024 तमे दिनाङ्के शिक्षानुसंधाननवाचारसांस्कृतिकं पारस्परिकञ्च क्षेत्रेषु संयुक्तरूपेण उत्कृष्टतापूर्वकं कार्यं कर्तुं शैक्षिकानुबन्धः सञ्जातः। पाणिनिसंस्कृतविश्वविद्यालयस्य कुलगुरुणा प्रो.विजयकुमार सीजीमहोदयेन कथितं यत् अनेन अनुबन्धेन द्वयोः संस्थानयोः छात्रशिक्षकाः परस्परं आकादमिक गतिविधिना सह नवाचारः, शिक्षा, शोधस्य क्षेत्रे च मिलित्वा उत्कृष्टतां वर्धिष्यते। महर्षिमहेशयोगीवैदिकविश्वविद्यालयस्य कुलगुरुः प्रो. प्रमोदकुमार वर्मा उक्तवान् यत् इदं एमओयू वेदाध्ययनं , संस्कृतं सम्बन्धितक्षेत्रेषु पाठ्यक्रम एवञ्च शिक्षणे परिष्कारस्य दृष्टया ज्ञानम् अनुसंधानम् च लक्षीकृत्य कार्यं कर्तुं कृतमस्ति । कुलसचिवेन प्रो. दिलीपसोनीवर्येण उक्तं यत् अनुबंधः परस्परं सहयोगं सम्बन्धान् च द्रणी करिष्यति। छात्रशिक्षकाणां विकासे च महत्वपूर्णां भूमिकां निर्वक्ष्यति। अवसरेस्मिन् हस्ताक्षरितं एमओयू परस्परं हस्तांतरितं जातम्। साक्षीरुपेण ज्योतिर्विज्ञानविभागाध्यक्षः डॉ. शुभमशर्मा अन्ये आचार्याः च उपस्थिताः आसन्।

# वृक्षारोपणं भारतीय-संस्कृतेः अङ्गम्

करतारपुरम्। वृक्षारोपणं नूनमेव करणीयं परन्तु तेषां बालः इव लालनं पालनं च विशेष दायित्वम्। बिना बालानामिव पालनेन वृक्षस्य भविष्यं सुरक्षितं न सम्भवति। एतद्वृत्तं वृक्षारोपणसमये गुरु विराजानन्द



गुरुकुल करतारपुरस्य प्राचार्येण डॉ उदयन आर्येण प्रतिपादितम्। अवसरेस्मिन् गुरुकुलस्य मुख्य मार्गे किन्नू, , नीम , अर्जुन छाल इत्येषां विशिष्टानाम् औषधीयपादपानाम् आरोपणं कृतम्। रोपित वृक्षाणां संरक्षणस्य दायित्वमपि वरिष्ठ विद्यार्थिनामेव वर्तते। तैः संकल्पितं यत् यावत् एते वृक्षाः न वर्धिष्यन्ते तावत् एषां लालनं पालनं च वयं करिष्यामः। अवसरेस्मिन् गुरुकुलस्य सर्वे अध्यापकाः शुभम्, हंसराजः, राजेशः, आदित्यः, अंकितः, जीवनः, जितेंद्रः, कमलदीपः, संतोषः, सुधीरः, सुरेशः, सूरज, अभिषेक तिवारी च उपस्थिताः। वरिष्ठ विद्यार्थिभिः स्वजन्मदिने एकस्य वृक्षारोपणस्य अपि संकल्पः स्वीकृतः।


## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249** 02.12.2006


# दरभङ्गाजनपदे कविनागार्जुनजन्मभूमौ तरौनीग्रामे सुसम्पन्नं दशदिवसीयसंस्कृतसम्भाषणशिविरम्

डॉ.छबिलालन्यौपानेः

दरभङ्गा। बिहारराज्यान्तर्गते दरभङ्गाजनपदे कविनागार्जुनजन्मभूमौ तरौनीग्रामे अवस्थितेन कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्याङ्गीभूतेन नागार्जुन-उमेश-संस्कृतमहाविद्यालयेन





२०२४तमवर्षस्य जुलाईमासस्य द्वितीयदिनाङ्कादारभ्यैकादशदिनाङ्कं यावत् दशदिवसीयं संस्कृतसम्भाषणशिविरं समनुष्ठितम्। संस्कृतसम्भाषणशिविरस्य अध्यक्षः महाविद्यालयस्य प्रधानाचार्यः डॉ.रामसंयोगरायः, संयोजकः डॉ.छबिलालन्यौपानेः, प्रशिक्षणप्रमुखश्च डॉ.वीरसनातनपूर्णेन्दुरायः आसीत्। शिविरकार्यक्रमस्य समापनसत्रे मुख्यातिथिरूपेण दरभङ्गाजनपदपरिषदध्यक्षा माननीया श्रीमती सीतादेवी, विशिष्टातिथिरूपेण च दरभङ्गाजनपदपरिषदः सदस्यः श्रीमान् अमरनाथशर्मा उपस्थितौ आस्ताम्। अनयोः अतिथ्योः स्वागतं मिथिलापरम्परानुसारेण उष्णीष-उत्तीरय-माल्यापर्णादिना विहितम्। संस्कृतसम्भाषणशिविरे डॉ.वीरसनातनपूर्णेन्दुरायनिर्देशने महाविद्यालयस्यान्यशिक्षकाः डॉ. विभूतिनाथझाः, डॉ.रंजीतकुमारठाकुरः, डॉ.सरस्वतीकुमारी, डॉ.रेणुझाश्च संस्कृतसम्भाषणं पाठितवन्तः। शिविरस्य सुव्यवस्थापनदायित्वं महाविद्यालयस्य शिक्षकैः डॉ.सरिताकुमारी-डॉ.नियतिकुमारी-डॉ. नीतेशकुमारमिश्रैः कार्यालयीयकार्यञ्च श्रीमुकुन्दकुमारेण निर्व्यूढम। संस्कृतसम्भाषणशिविरेऽस्मिन् प्रशिक्षणार्थम् (९०)नवतिसंख्यकाः महाविद्यालयस्य छात्राः सामाजिकाः च प्रशिक्षार्थिनः आसन्, येषु श्रुतिप्रिया, कबीरदासः, अञ्जूः, नीतीशः, अभिनवः, मीनूः, आरती, छोटी, सृष्टिः, अञ्जलिः, प्रभुसहनी, सुरेशसहनी, बालकृष्णः, अनुः, पूजा, अरविन्दः, सुमितपासवानः, लक्ष्मीः, पुष्पाञ्जलिः, आदित्यः, राजकुमारझाः, वीणीपाणिः च इत्यादिभिः विद्यार्थिभिः संस्कृतसम्भाषणशिविरे प्रशिक्षणानुभवं सरलसंस्कृतभाषामाध्यमेन व्यक्तीकृतम्।

प्रथमपुटस्य शेषभागः

# भारतीयज्ञानपरम्परा संस्कृतं च परस्परं पूरकं वर्त्तते...

प्रो.पंकजचान्देवर्यः संस्थापककुलगुरुः, कविकुलगुरूकालिदाससंस्कृतविश्वविद्यालयः ,रामटेकम्, स्ववक्तव्ये उक्तवान् यत् सांप्रतिकेकाले प्राचीनशिक्षाव्यवस्थां पुनः परिवर्तितरूपेण प्रस्तौतुं आवश्यकता अनुभूयते। शास्त्रेषु वर्णितां ज्ञानसम्पदां उद्योगप्रदायिनीं कर्तुं तथा पाठ्यक्रमाः निर्मातव्याः। येन संस्कृतच्छात्राः व्यवसायिकमूल्याधारितशिक्षां ज्ञानं च प्राप्नुयुः। संस्कृते ज्ञानविज्ञानस्य असीमितभाण्डागारः अस्ति । अध्यक्षतां कुर्वन् कुलगुरुः प्रो.विजयकुमारसीजीमहोदयः उक्तवान् यत् मध्यप्रदेशः भारतीयज्ञानपरम्परायाः सन्दर्भे तथा च नूतनशिक्षानीतेः परिप्रेक्ष्ये बृहत्परिमाणेन कार्यं कुर्वन् अस्ति। नूतनशिक्षानीतौ आधुनिकज्ञानेन सह शास्त्रज्ञानस्य महत्त्वमपि दृश्यते। विशेषातिथिः महर्षिसान्दिपिनीराष्ट्रियवेदविद्या प्रतिष्ठानस्य, सचिवः, प्रो.विरूपाक्षजड्डीपालः उक्तवान् यत् संस्कृते निहितस्य ज्ञानस्य अनुवादं कृत्वा अन्यभाषासु शिक्षणम् एवञ्च वेदेषु निहितानां वैज्ञानिकतत्त्वानाम् अन्वेषणम् अध्ययनञ्च आवश्यकम् वर्तते। संस्कृतभाषा प्रौद्योगिक्याः कृते अतीव उपयुक्ता अस्ति। सारस्वतातिथिः प्रो.नीलाभतिवारी केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य शिक्षाशास्त्रविभागप्रमुखः राष्ट्रियशिक्षानीतिः २०२० इत्यस्य सन्दर्भे उक्तवान् यत् विद्यालयशिक्षातः भारतीयज्ञानपरम्परायाः ज्ञातज्ञातविषयान् नूतनरूपेण प्रस्तौतुं कार्ययोजनायाः आवश्यकता वर्त्तते। अतः संस्कृतशास्त्राणां सरलीकरणे, अध्यापने च बलं दातव्यम् । कार्यपरिषदसदस्येन श्रीसुशील बाडियामहोदयेनापि स्वविचाराः प्रस्तुतः।

कार्यशालासंयोजकेन डॉ. तुलसीदासपरौहामहोदयेन प्रस्तावना, सचिवेन डॉ.अखिलेशकुमारद्विवेदी महोदयेन ,अतिथिपरिचयः च कृतः। कुलसचिवः प्रो. दिलीपसोनीमहोदयः उक्तवान् यत् राष्ट्रियशिक्षानीतिः २०२० कार्यान्वितुं मध्यप्रदेशः देशे अग्रणीभूमिकायां वर्तते। पाणिनिसंस्कृतविश्वविद्यालयः भारतीयज्ञानसम्पत्त्याः संरक्षणाय प्रसाराय च प्रतिबद्धः अस्ति। कार्यशालायां प्रो.विष्णुपद् महापात्र, नवदेहली, डॉ. नोनिहाल गौतमः, सागरम्, डॉ. हरेन्द्रभार्गवः, दतिया, प्रमुखरूपेण आसन्। कार्यक्रमस्य संचालनं डॉ. पूजा उपाध्यायमहोदया, कृतज्ञतासमपर्णञ्च डॉ. उपेन्द्र भार्गवमहोदयेन कृतम्।

# गुरुकुल-गुरु-विरजानन्द-महाविद्यालय करतारपुरे संस्कृतभारत्याः भाषाप्रबोधनवर्गः सम्पन्नः

करतारपुरम्। समापनकार्यक्रमे मुख्य वक्ता श्रीमान नरेंद्र कुमारः , अध्यक्षः वीरेंद्र कुमारः, विशिष्टातिथिः ध्रुवकुमार मित्तलः ,मुख्यातिथिः डॉ सुधीर शर्मा, प्रो. रवि दत्त कौशिकः




,आचार्य निगम स्वरूपः, अजय कुमारः ,मुख्य अध्यापकः टेकचंदः ,रविंद्र गिरी ,जमशेद भगवान् ,संजीव कुमारश्च इत्येषां गुरुकुल प्रांगणे पुष्पाहारेण स्वागतं विहितम्।

मुख्यातिथिना नरेंद्रेण भाषितं यत् ईश्वरः उत्तम कार्येभ्यः उत्तमानां चयनं करोति संस्कृत भाषायाः प्रचारः प्रसारःच उत्तम कार्यम्। वयं सौभाग्यशालिनः । विशिष्टातिथिना ध्रुव मित्तलेन कथितं यद् भाषा व्यापारेण सह युज्यते चेत्तदीया उन्नतिर्भवति। संस्कृत भाषा अपि व्यापारेण आयुर्वेदेन सरकारिकार्यैश्च सह योजयितुं शक्या।

डॉ सुधीर शर्मा कथितवान् यत् संस्कृत भारती एकम् उद्यानमिव पुष्परूपसंस्कृतानुरागिणां पालनं कुरुते। आचार्य निगम स्वरूपः अकथयत् यत् सरल कार्य सर्वे कुर्वन्ति कठिन कार्यं वयं कुर्याम। अवसरेस्मिन् शिविरस्य विद्यार्थिभिः गीतं, भाषणं, नाटकं,धन्यवाद ज्ञापनं च सांस्कृतिक कार्यक्रमरूपेण प्रस्तुतानि। धन्यवाद ज्ञापनं कुर्वता महाविद्यालयस्य प्राचार्येण डॉ उदयन आर्येण कथितं यत् संस्कृत भारती संस्कृतस्य प्रचाराय प्रसाराय च अहर्निशं प्रयासरता। इयं भागीरथीरूपेण अस्सद् विद्यालयं यावत् आगता तदर्थं संस्कृत भारत्यै आभार व्यक्तीकरोमि। अवसरेस्मिन् गुरुकुलस्य अधिष्ठाता सुखदेव राज। शिविर अध्यापकः अभयः ,रामलालः ,करणः,पवनः ,एवं च गुरुकुल्याध्यापकगणः विद्यार्थिनश्च उपस्थिताः।

प्रथमपुटस्य शेषभागः **तमिलनाडौ संस्कृत प्राकृत अध्ययनस्य....**

च प्रतीता।

संमान्य स्वामिनः आशीर्वादेन कार्यशाला सम्पन्ना। अस्मिन् १३ राज्येभ्यः ४०चयनिताः अध्यतारः भागं गृहीतवन्तः मेधा कर्मणि आगताः प्रतिभागिनोपि सम्मानिताः । आहत्य ४० प्रतिभागिषु ३५ अध्येतृभिः परीक्षा लिखिता। येषु हर्षिता पतंगिया, अब्बूबेकेर सिद्दीकी, शुभम रोटे च क्रमशः प्रथमेन, द्वितीयेन तृतीयेन च पुरस्कारेण सम्मानिताः । ०६ अध्यतृभ्य सांत्वना पुरस्कारः दत्तः।

२१ दिवसीयायां प्राकृत भाषाम् आधृत्य आयोजितायाम् अस्यां राष्ट्रिय कार्य शालायां प्रतियोगितायाः लक्ष्यं प्रतिभागिभिः भाषा ज्ञान सीमानं चिह्नीकृत्य भाषा ज्ञानस्य प्रोत्साहनं विधाय तदीयश्रीवृद्धिश्रपि करणीया वर्तते।

कार्यक्रम संयोजकः प्रो मधुकेश्वर भटः कथितवान् यद् एवंविधेन आयोजनेन देशस्य सांस्कृतिकी भाषागत जागृतिः आयास्यति। तेन एन.ई.पी.2020 चिन्तनाय पर्याप्त बलमपि लप्स्यते । सह संयोजकः डा चक्रधर मेहरः प्राकृत भाषायाः अन्ये विद्वांसः प्रसन्नतां व्यक्तीकृतवन्तः।

# उत्तराखण्डविद्वत्सभा दिवङ्गतेभ्यः अमरहुतात्मभ्यः श्रद्धांजलिं समर्पयत्

(पंचायतीमंदिरम्, देहरादूनम् )

जम्मू-काश्मीरस्य कठुआ जिल्लायाम् आतंकवादिसम्प्रहारात् दिनद्वयात्परं सैन्य अधिकारिणः घटनाक्रमविषये असूचयन् । तत्र पञ्चसैनिकाः दिवं प्रयाताः । तत्र भारत मातुः रक्षायै प्राणानां बलिदानं कृतवद्भ्यः उत्तराखंडस्य पञ्चभ्यः अमर हुतात्मभ्यः सभाद्वारा अध्यक्षस्य विजेंद्र ममगाईवर्यस्य श्रद्धांजलि कार्यक्रमः पंचायती मन्दिरे दर्शन लाल चतुष्पथे देहरादूने सभाध्यक्ष



आचार्य विजेंद्र प्रसाद ममगाईवर्यस्य नेतृत्वे सम्पन्नः। तत्र अवसरेऽस्मिन् उपाध्यक्षः आचार्य सत्य प्रसाद सेमवालः महासचिवः आचार्य दिनेश भटट्ः संगठन एवं सांस्कृतिक सचिवः आचार्य सुभाष चमोली सह सचिवः आचार्यः मुरली मनोहर सेमवालः, प्रवक्ता आचार्य मुकेश पंतः लेखा निरिक्षकः आचार्य उमेश भट्टः , सभायाः पूर्वाध्यक्षः आचार्य जयप्रकाश गोदियालः पूर्वोपाध्यक्षः आचार्य भरत राम तिवारी, पूर्वमहासचिवः आचार्य चंद्रप्रकाश ममगांईः कार्यकारिणी आचार्यसदस्येषु परशुराम उनियालः धीरज मैठाणी मदनमोहन मैठाणी, शशीवल्लभ पंतः कालिका प्रसाद थपलियालः महेंद्र थपलियालः कविंद्र सेमवालः मंगलेश ममगांईः , सुनील शर्मा, अनसूया प्रसाद ममगांईः विपिन रतूड़ी, रजनीश भट्टु इत्यादयः समुपस्थाय देशाय बलिदानं कृतवद्भ्यः वीरेभ्यः अमर हुतात्मभ्यः श्रद्धा सुमनांसि श्रद्धांजलिं च समर्पितवन्तः।



प्रथमपुटस्य शेषभागः **भरूआ-सॉल्यूशन्स-तत्वावधाने....**

समर्पणस्यैव परिणामः। तेन कथितं अधुना भरूआ सॉल्यूशन्स स्वीय प्रारंभिक अवस्थायां वर्तते यः विशाल वट वृक्षस्य बीजमिव अस्ति। अधुना अस्य व्यापक विस्तारः करणीयः।

कार्यशालायां भरूआ साल्यूशन्स अध्यक्षः श्री इरेन्द्र छाबड़ा, उपाध्यक्षः कविंद्र सिंहः, पतंजलि आयुर्वेद लि. के आई.टी. हैड पवन सिंहः इत्येतैः सहिताः भरूआ सॉल्यूशन्स हरिद्वार हैदराबाद नोएडा एकांशिकायाः 250 तः अधिकाः कर्मचारिणः उपस्थिताः आसन् । आचार्येण अस्मै निधये बेस्ट परफामर्स पुरुस्कारः प्रदत्तः।



# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

परिश्रमेण निष्ठया च संघर्षरतेन सता जीवने सहिष्णुता आप्यते। या ज्ञानवर्धनेन सह जीवने सहनशीलता, मधुरता, शांतिः, विनम्रता, समाधान परक चारित्र्यं च उत्थापयति आनयति च । मनुष्यस्य एते गुणाः तं देव तुल्यं निर्मान्ति।

यत्र सहज प्राप्तिः मनुष्यस्य मनसि अहंकारस्य बीजारोपणं करोति। तत्रैव अप्रत्याशित सफलता मनुष्यस्य बुद्धौ प्रचंड अहंकारस्य ध्वजं रोपयति । समये समये असंयमित भाषायां तदीया असहिष्णुता, विवेकहीनता, अभिमानिता, हटवादिता, परनिंदा, इत्येतान् दुर्गुणान् प्रदर्शयति। अहंकारिणे मनुष्याय स्वविरोध मत्कुणः, मशकः इव निष्कामौ प्रतीयेते । वार्तायां प्रलपनम् अस्तित्वदर्शनस्य कथनं च स्वभावे तेषां भवति। ते न अवगच्छन्ति यत् दंभः दर्पस्तु महापंडित रावणस्यापि न अवशिष्टः साधारण मनुष्यस्य वार्ता तु का ? अहंकारिणः शिरः अधो भवति इत्यस्य विशेषेण ध्यानं देयम्।

आशासे यद् वयं सर्वे देशवासिनः नूतने वातावरणे मधुरां संयमितां भाषां प्रयुञ्जानाः पारस्परिकसौहार्दं स्थापयेम।

अद्य सहिष्णुता समयस्य सम्बोधनम् अपेक्षा च विद्यते।

भवदीया

सम्पादिका

।। वेद वाणी ।।

'यस्य ते पूषन्सख्ये विपन्यवः क्रत्वा
चित्सन्तोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे ।
तामनु त्वा नवीयसीं नियुतं राय ईमहे ।
अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव।।।

'O! Lord Pushan, the Nourisher,"the wise,with Your protection and in friendship with You, gain joy and all ends of life. Be being in accord with the most laudable wisdom of Yours, we seek infinite wealth and riches. May the Supreme Lord, praised by all, come to our defence in every battle with our enemies.'

The Rig Veda 1.138.3

'इन्द्रं मित्रं वरुणमग्निमाहुरथो
दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं
यमं मातरिश्वानमाहुः'

'The Divinity is One. The sages call It by varied names like Indra,Mitra, Varuna, Agni and well-winged Garutman.

The Rig Veda 1.168.46

'आ नो भद्राः क्रतवो यन्तु
विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो
रक्षितारो दिवेदिवे।।'

'Let auspicious works, that take us, unimpeded and unmolested, to a higher level in life, come to us from all sides. May the gods, that do not obstruct our progress but grant protection to us day by day,be ever with us for our advancement.'

'The Rig Veda 1.89.1

'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।।'

'Speech or Vac is measured out in four forms and at four levels:Para, Pashyanthi, Madhyama and Vaikhari. The first three of them remain hidden and inaudible within us.The wisest alone know all the four while common men know only the last one, Vaikhari."Para lies at the deepest level and is verily the unmanifest Supreme Being in the form of Sabda Brahman. It is pure consciousness."Pashyanti is the latent, unspoken thought that springs from the Unmanifest and is visualized, within self,by seers. It is the internal intent of speech. And when this transforms itself into an intellectual process in the form of thoughts in mind, it is called Madhyama. In this intermediate stage, words give shape to thoughts arrayed in sequence. It isa pre-vocal, internal speech or voice of silence. Vaikhari is the articulated speech-the verbal expression of thoughts. It is the spoken word.
This is one of the most mystic mantras of the Rig Veda and is interpreted variously."The above is a simple explanation for a common man."Speech is indeed indivisble and the above gradations are not water-tight. The Vedic philosophy here is foundational while the Western approach to phonetics seems limited.

The Rig Veda 1.164.45

**संकलन : एस.वासुदेव रावः**

# विश्वकल्याणार्थं वेदस्यावदानम्

**विद्यावाचस्पतिः प्रो० सुन्दरनारायणझा**
**आचार्यः (वेदविभागः)**
**श्रीलालवहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-16**

सर्वविदितमेवैतद्यद्वेदा अस्माकं जीवनाधावकाः, सर्वविधकल्याणकारकाः, सर्वविद्यानिधिभूताश्च सन्ति। साम्प्रतमुपलभ्यमानाः सर्वेऽपि ज्ञानविज्ञानात्मकाः विषयाः वेदादेव प्रस्ताः। तध्यमेतत्प्रकाशयन् भगवान् मनुराह-

**'सर्वज्ञानमयो हि सः'** इति ।

एतस्मादेव कारणाद्वेदानामध्यवनमिहापरिहार्यत्वेन अनिवार्यत्वेन चोपदिष्टम्। तदुक्तमपि मनुना-

**योऽनधीत्व द्विजो वेदमन्यत्र कुरुते श्रमम्।**
**जीवन्नेव शुद्रत्वमाशु गच्छति सान्वयः।।**

अर्थाद्यो हि द्विजो वेदमनधीत्यान्यत्र श्रमं विदधाति स इह शूद्रो मतः। अत इदमुच्यते यद्वेदानामध्येतारो मेधाविनः विद्वांसश्नेह निवसन्तोऽपि ब्रहाभूवाय एव कल्प्यन्ते। तदुक्तम्मनुना-

**वेदशास्वार्थतत्त्वज्ञो यत्र कुत्राश्रमे वसन्।**
**इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते ।।**

मनूक्तवचनेनानेनेदं सुव्यक्तं भवति यद्वेदस्यार्थतत्त्वज्ञानस्य महत्त्वमत्युत्कृष्टतममस्ति।

अर्थतत्त्वज्ञानाय चानेकविध वैदिक साहित्यस्याध्ययनम् अनिवार्यमस्ति। तदुक्त केनचिद्विदुषा-

वेदे काञ्चनपत्तने परिलषद् वेदान्तदुर्गो महान्
मीमांसा परिखा विभाति पुरतः शाब्दं लषद्गोपुरम्।
योगो यामिनिजागरूकनिचयः साङ्ख्यं विवेकात्मकं
धर्मं चोरयिंतुं विशन्ति सुभगाः नैयायिकाः रक्षकाः।।

उपर्युक्तानां शास्त्राणामध्ययनं बिना वैदिकपदानां तात्विकार्थज्ञानमसम्भवमिति सर्वैरप्यङ्गीक्रियत एष।

वेद इत्ति शब्दश्रवणादृग्यजुस्मामाधर्वसञ्चाकानां शब्द- राशिभूतानां चतसृणाममि संहितानां बोधो भवति। यद्यपि आपस्तम्बादिभिवैदिकैराचार्यैर्वेदानां द्विविधं स्वरूपं स्वीक्रियते **'मन्त्रब्राह्मणयोर्वेदनामधेयम्'** इति। तत्र मन्त्रब्राहाणयोर्लक्षणं प्रस्तूयता महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायामुक्तम्-

**'तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते। विधायकं वाक्यं ब्राह्मणम्' इति।**

**'ब्रह्म वै मन्त्रः'** इति ब्राह्मणोक्तवचनाद् ब्रहावेदयोरैक्यं सिद्धयति। अत्र ब्रह्मपदं कर्मबोधकं सद् यज्ञस्यैवोद्बोधकमिति ज्ञायते। तस्माद्यज्ञादीनां साङ्गोपाङ्गानि विधिविधानानि यत्रोक्तानि तानि ब्राह्मणानीति।

ब्रहापदव्याख्यानावसरे प्राचीनैर्ऋषिभिरेवमुक्तम्-

**द्वे बहाणी वेदितव्ये शब्दब्रह्मपरञ्च यत्।**
**शाब्दे ब्रह्मणि निष्णातः परब्रह्माधिगच्छति ।।**

शब्दब्रह्मरूपेणात्र शब्दरशिधृताः पन्वब्राह्मणात्मकाः वेदरा उक्ताः। परब्रह्मपदेन च सर्वजगत्कारण भूतानादिनिधनाव्यक्तागोचरा-नन्तादिपदैर्व्यवह्रियमाणः परमात्मा बुध्यते। तन्त्रेदमुच्यते वच्छन्दब्रह्मरूपा वेदा परब्रह्मणों मूलस्वरूपमुपवर्णयन्ति। तेनेदं सिद्ध यद्वेदेषु ये मन्त्राः पठिताम्सन्ति तेषां तात्त्विकार्यज्ञानद्वारा शब्दब्रह्माणि निष्णावतामवाप्तुं शक्यते। ये जनाः शब्दब्रहाणि निष्णाता भवन्ति ते परब्रहाजमंधि गच्छन्तीति।

तत्रापि च मन्त्रब्राह्णात्मकेषु वेदेषु यस्य यज्ञस्वरूपस्य परमात्मनो विगये ख्याख्यानमस्ति स मनः- प्राण-वागानन्द- विज्ञानमयोऽस्तीत्युक्त उपनिषदादिषु। तताथा **'स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आयोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोध मयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदम्मयोऽदोमय इति।**

अनेनेदं सिद्धयति यद्वेदेषु सर्वविधज्ञानविज्ञानं सुविस्तृतेन व्याख्यातमस्ति । तस्मान्मनूक्तवचनमिदं **सर्वज्ञानमयो हि सः** इति साधुरेव। तत्र ज्ञानमिति कथनेनाध्यात्मविद्याया बोधो भवति। यतस्त्वने कस्मादेकस्मिन्नारोहणं ज्ञानं ब्रह्मविद्येत्युच्यते। तथैकस्मादनेकस्मिन्नवतरणं विज्ञानं यज्ञविद्येति। तस्मादुक्तं श्रुतौ- विज्ञानं यज्ञं तनुते इति।

अनेनेदं स्फुटं भवति यद् ब्रह्मविद्यातिरिक्ताः सर्वा अपि विद्या अनेकत्वग्राधान्याद् यज्ञविद्यायामर्थाद्विज्ञान एवान्तर्भवन्ति। विज्ञानस्य कर्माणि प्रायोगिकस्थलान्यपेक्षन्ते, अतो विज्ञानं यज्ञविद्येत्युच्यते। आभ्यामेव ज्ञानविज्ञानाभ्यां मानवस्य कृतकृत्यता सम्पद्यते। इदमेव ज्ञानविज्ञानयुगलं मुख्यो धर्मः। तत्र ज्ञानं निःश्रेयसजनकम्, विज्ञानन्त्वभ्युदयहेतुः। तदुक्तं कणादेन- **यतोऽभ्युदयनिःश्रेयससिद्धिस्स धर्मः** इति।

उपर्युक्तैर्विवेचनैरिदं स्फुटं यद्वेदेषु सर्वविधज्ञानविज्ञानस्य पर्याप्तसामग्रंचो विद्यन्ते। अस्माकं पूर्वजैः कृष्णाजिनेषूपविष्टैः सत्यसन्धानतत्परैर्ऋषिभिर्यत्किञ्चिदवलोकितं तत्सर्वमप्याधुनिकैः नवीनैवैज्ञानिकैरनुसन्धितमिति। रहस्यस्यास्योद्घाटनमृग्वेदस्यैकेन मन्त्रेण भवति यथा-

**अग्निः पूर्वेभिऋषिभिरीड्घ्यो नूतनैरुत। स देवाँ एह वक्षति ।।**

अत्र पूर्वेभिऋषिभिरिति कथनेन पुरातनैर्वशिष्ठात्रि-कश्यपादिभिर्मन्त्रद्रष्ट्रघभिरिति बुध्यते। नूतनैरिति पदेन चान्यैः श्रुतर्षिभरिति, तैश्च पुरातनैर्नूतनैश्च ऋषिभिस्सोऽग्निरीड्य इति स्फुट भवति। सम्प्रत्यनुसन्धांनशब्दोच्चारणेन स एवार्थोऽवगम्यते। यथा- अन्विति पदमानन्तर्यस्य बोधकम्। सन्धानमितीक्षणम्। उभयमपि मिलित्वाऽनुसन्धानमिति सिद्धयति। अस्यानुसन्धान- पदस्यानेके पर्याया विद्यन्ते अन्वेषणम्, गवेषणम्, अन्वीक्षणम्, शोधकार्यमित्यादयः। अत्र प्रश्न उत्पद्यते यदनुसन्धानं कस्य भवति? तन्त्रेदमुच्यते यद्यस्य वस्तुनः पूर्व सन्धानं कृतं स्यात्तस्यैवेदानीं पुनरवलोकनायानुसन्धानं क्रियते। शब्दोऽयं वैज्ञानिकभाषायां प्रयुक्तः। तस्माद्वेदेषु वैज्ञानिकविषयाणां विवेचनमस्तीति कथने न कस्यापि विप्रतिपत्तिरिति।

विज्ञानमिति पदस्यार्थो भवति विशिष्टं ज्ञानम्। तत्र अमरसिंहेनोक्तम्- **मोक्षे धीर्जानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।** इति। भगवता श्रीकृष्णेनाप्युक्तम्-

**"ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः"** इति। अर्थाच्छिल्पशास्त्रादिषु यदाविष्कारात्मकं ज्ञानं व्याख्यातं तद्विज्ञानपदबोध्यमिति। यज्ञादिकं शिल्पशास्त्रान्तर्गतमेव स्वीक्रियते, यतस्तत्र वेद्यादिसाधनं शिल्पानुमतमेव भवति। याज्ञिकप्रक्रिया चापि पूर्णतो वैज्ञानिकी भवति, तत्र यजमानस्यासवृत्तेर्विनाशः

सद्वृत्तेरुदयश्च क्रियते। तेन स स्वर्गमाप्नोति। एतस्मादेव कारणात्

**आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति।** तथा च-

**आत्मा वै यज्ञः** इत्युक्तं श्रुतिषु।

आत्मसंस्काररूपं कर्म नावैज्ञानिकं भवितुमर्हति। यत आत्मनो विज्ञानरूपत्वं स्वयं सिद्धम्। तस्य विज्ञानरूपस्यात्मनः संस्कारो विज्ञानं विना कथं शक्यः? अतो यज्ञस्य वैज्ञानिकत्वमुक्तश्च पूर्वम्। आधुनिकविज्ञानानुसारं येषां वैज्ञानिकविषयाणामध्ययनमुक्षुष्टं तत्सर्वमत्र वेदे विस्तृतेन व्याख्यातमस्ति। यथा भौतिकविज्ञानम्, रसायनविज्ञानम्, वनस्पतिविज्ञानम्, जन्तुविज्ञानम्, प्रौद्योगिकी- विज्ञानम्, कृषिविज्ञानम्, गणितविज्ञानम्, ज्योतिर्विज्ञानम्, वृष्टिविज्ञानम्, पर्यावरणविज्ञानम्, अन्तरिक्षविज्ञानम्, भूगर्भविज्ञानम्, आयुर्विज्ञानम्, सूर्यविज्ञानम्, अग्निविज्ञानम्, खगोलविज्ञानम्, पिण्डविज्ञानम्, ब्रह्माण्डविज्ञानम् इत्यादीनि सर्वाण्यपि विज्ञानानि वैदिकयज्ञविज्ञानान्तर्गतानि सन्ति।

वेदेषु उपर्युक्तैराधुनिक विज्ञानविषयैश्चाप्यधिक वैज्ञानिकविषयाणां वर्णनान्युपलभ्यन्ते तानि च विज्ञानान्यस्माभिः विस्मूनानि, सम्भाव्यते यत्कालान्तरेषु तान्यस्माकं साक्षात्कृतानि स्युः, परमधुना दाद्येन वक्तुमशक्यानि।

जगति सर्वेश्वेत्र जडचेतनात्मकंषु पदार्थेषु गत्यागती प्रवर्तते। सर्वत्र व्याप्तो ह्याग्निः प्राणो भूतसहत्कृतः स्वभावेन प्रतिक्षणं निष्काम्यति, तेन जाता क्षतिश्चापरत आगतेन सोगेनाग्निरूपतामाप्तेन प्रपूर्वत इति सर्वेषामेव पदार्थानां जीवनं यज्ञासत्तम्। बजागतिरधिका, गतिश्चाल्या तत्पुष्टी भवति। यत्र तु गतिरधिका, आगतिश्वं वमेन विच्छिन्नतवाल्पा तन्जीर्ण भूत्वा विनश्यतीति भावविकारविवरणे निरुक्तादिषु स्पष्टीकृतम्। प्रक्रियेवं प्राकृत्तिको खत्तुः इमामेव प्राकृतिकों प्रक्रियामालम्ब्य कृत्रिमा यज्ञा विहिताः। यज्ञानां विषये भगयता कात्यायनेन प्रोक्तम्- **द्रव्यं देवता त्याग** इति।

अर्थाद् यत्राग्न्यादिदेवतामुद्दिश्य सोमादिद्रव्याणामाहुतिरीयते तत्र यज्ञः सम्पद्यते। प्रसिद्धं सोगयागे लतारूपः सॉम एव कण्डनेन रसतामापाय हुयते। इष्ट्यादिषु यत्र सोमाहुत्तिर्न भवति तत्रापि येषु द्रव्येषु मोमस्य प्राधान्यं तान्येव गव्यघृतदुग्धादीनि चर्वादीनि च हृयनो।

इति। तदुक्तं बृहज्जाबालोपनिगदि अग्नीषोमात्मकञ्जगत्

अत्रोच्यते यद् द्विविधाः हि लोके भवन्ति पदार्थाः- ऋतरूपाः, सत्यरूपाश्च। वद्धि केन्द्रबद्ध न तिष्ठति प्रत्वृतमेव विकीर्णभावेन प्रसरति, तद् ऋतमित्युच्यते। यथा वायुराषः सोम इत्येकस्यैव तत्त्वस्येमास्तियोऽवस्थाः। स्थूलावस्था आपः, तासां सूक्ष्मावस्था वायुः, तदपेक्षयापि सूक्ष्मतमावस्था सोमः। सोऽयं सोमः सर्वत्राकाशेऽभिव्याप्तः। यथोक्तं सोमस्तुतिमन्त्रे-

**त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनवस्त्वं गाः।**
**त्वमा ततन्धोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ।।**

सोऽयं सोमः सर्वस्मिन्नन्तरिक्षे ऋतरूपेण स्थितः। शतपथब्राहाणेऽप्युक्तम्-

शेषभागःपंचमपुटे

चतुर्थपुटस्य शेषभागः

# विश्वकल्याणार्थ....

**अन्नाद एवाग्निरभवदन्नं सोमोऽन्नादश्च वा इदं सर्वमन्नञ्च** इति।

अग्निस्तु केन्द्राधारेण तिष्ठतीति स सत्यः। अग्निरपं विकसनशीलः केन्द्राद् बहिरभितो विकसन्नपिव्याप्नोति। सोमस्तु सङ्कोचशीलोऽभितः सङकुचन अग्नी पतति, संयमेव सोमस्य अग्नावाहुतिः। अनवैवाहुतिप्रक्रियया पजस्व स्वरूपं सुस्पष्टं भवति। यज्ञ एव हि मनुष्याणां मुख्यो धर्मः। स एव जगतामुत्पादको रक्षन्कश्चेत्यार्यशास्त्रेषु पदे पदे गीतम्। अयं यज्ञ एवं मनुष्याणां देवानाञ्च पारस्पस्सम्बन्धस्थापकः। तदुक्तं भगवता भगवद्घ्गीतायाम्–

**देवान् भावयतानेन ते देवा भावयन्तु वः।**
**परस्परम्भावयन्तः श्रेयः परमवाप्स्यथ।।**

चज्ञेन मनुष्या देवान् भावदन्ति, भाविताः पूजिताश्च देवा मनुष्यानुपकुर्वन्तीति देवानां मनुष्याणाञ्च पारस्परिक सम्बन्धो वैदिकप्रक्रियायां व्याख्यातः।

भावस्य स्वरूपमुपवर्णयता निरुक्तस्य प्रसिद्धेन टीकाकारेण झोपार्द्धन मुकुन्दमहोदयेनेदमुक्तम्

**भावो भावना सैवोत्पादना सैव च क्रिया।**

अर्थाद् भावस्य यो विकारग्स क्रियाया एव विकारस्तस्माद् भावविकार उत्ति कथनेन क्रियाविकारस्यैव बोधो भवति। क्रिया च खलु कर्मव्याचररूपा, सन्च व्यापारः बहुविध उत्तः। तेन क्रियायाश्चाप्यनेकरूपता सिद्धचत्येव। मवाप्येषा क्रिया विधा– **यज्ञो दानं तपश्चेति।** तिसश्चेमाः क्रियाः मनोवाव्त्राणेषु सन्निहिताः सन्तः वेदरूपतामेनाकलयन्ति। तद्यथोक्तं श्रुती–

**त्रऋचं वाचं प्रपहो मनो बजुः प्रपो सामप्राणं प्रपणे** इति।

अस्मिन् मन्ववाक्य ऋग्वेदो वायुपेण, यजुर्वेदो मनोरूपेण सामवेदश्च प्राणरूपेण स्तुतः। कथनस्यास्य तात्पर्यमिदमस्ति यत्प्रत्येकेषां वस्तूनां त्रीणि मण्डलानि भवन्ति। पिण्डरूपमेक मण्डलम्, यदृगित्युच्यते। तस्मात् पिण्डाच्च तदीयाः प्राणा निष्क्रम्य बहिश्चरन्ति। यस्मिन् स्वल्पे महति वा प्राणे यावती शक्तिः तावद् दूरमेव रा प्रचरति। पार्थिवेषु पदार्थेष्वग्निरेव प्राणः। चावमग्निप्राणो द्विविधः चित्यः चितेनिधेश्यच। चायमग्निप्राणो द्विविधः चित्यः चितेनिधेयश्च। चित्याः प्राणा मर्त्याः, चितेनिधेयास्त्वमृताः। तत्र चित्याः प्राणाः स्वचयनेन वस्तुस्वरूपं निष्पादयन्ति, तद्रक्षण एव च व्यापृतास्तत्रैव तिष्ठन्ति। चितेनिधेयास्तु बहिरपि प्रचरन्ति। एषां प्राणानां यदन्तिमं मण्डलं तत्साममण्डलमित्युच्यते। यावती यस्य ऋग्भवति तदनुकूलमेव तस्य सामेति समत्वात् सामशब्दः प्रयुज्यत इति तदभिप्रायः।

ऋचमारभ्य सामपर्यन्तं प्रत्येकस्मिन् बिन्दौ शतशो मण्डलानि सन्ति, तेषु च यत्प्राणरूपमग्नितत्त्वं व्याप्तं तदेव यजुरित्युच्यते। तदेतत्सूर्यमण्डलमधिकृत्य श्रुतिराह–

**यदेतन्मण्डलं तपति तन्महदुक्थं ता ऋचः स ऋचां लोकोऽथ यदेतदर्चिर्दीप्यते तन्महाव्रतं तानि सामानि स साम्नां लोकोऽथ य एतस्मिन् मण्डले पुरुषः सोऽग्निस्तानि यजूंषि स यजुषां लोकः सैषा त्रय्येव विद्या तपति।** इति।

अथ यदेव किञ्चिदृग्यजुस्सामसाध्यमग्निप्रयुक्तं कर्मजातं स यज्ञः। अनेन कथनेनेदं सुव्यक्तं भवति यद्विश्वकल्याणार्थ वेदस्य महत्त्वपूर्णमवदानमस्ति। यतो वेदेभ्य एव समस्तानां यज्ञ–यागादिक्रियाकलापानां ज्ञानं सम्भवति। यज्ञेनैव सर्वे देवाः, पशवो मनुष्याश्च सर्वविधं कल्याणमाप्नुवन्तीत्यत्र नास्ति काचिद्विप्रतिपत्तिः। उक्तमपि–

**यज्ञेन देवा जीवन्ति यज्ञेन पितरस्तथा ।**
**देवाधीनाः प्रजाः सर्वा यज्ञाधीनाश्च देवताः।।**
**यज्ञो हि भगवान् विष्णुर्यत्र सर्वं प्रतिष्ठितम्।**
**यज्ञार्थं पशवः सृष्टा देवास्त्वौषधयस्तथा।।**
**यज्ञार्थं पुरुषाः सृष्टाः स्वयमेव स्वयम्भुवा।**
**यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञपरो भवेत् ।।**
**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।**
**धनं यद्यज्ञशीलानां देवस्वं तं विदुर्बुधाः।।**
**यज्ञेन सम्यक् पुरुषस्तु नाके**
**सम्पूज्यमानस्त्रिदशैर्महात्मा।**
**प्राप्नोति सौख्यानि महानुभावः**
**तस्मात्प्रयत्नेन यजेत यज्ञैः ।।**

अतोऽनेन विवेचनेनेदं स्फुटं भवति यद्वेदेषु यज्ञानां वर्णनं प्राधान्येन वर्तते। यज्ञश्चात्र विज्ञानरूपेण स्तुतः, तस्माद यज्ञविज्ञानात्सर्वमपि रहस्यमयं तत्त्वं विज्ञातम्भवत्यत्र नास्ति काचिद्विप्रतिपत्तिः। यज्ञविज्ञानबोधकत्वाद् वेदानां सर्वेषु शास्त्रेषु प्रामुख्यं वर्तते। यतस्तु यज्ञो वैदिकसंस्कृतेः प्रधानमङ्गमस्ति। यज्ञेनैव समस्तस्यापि संसारस्य कल्याणं सम्भवति। यज्ञेषु लोककल्याणस्य भावना विशेषरूपेण निहिता भवति। तदुक्तमैतरेयेण– यज्ञोऽपि तस्यै जनतायै कल्पते। इति।

अस्माकं धर्माचार्याः मनुष्येभ्य यज्ञलक्षणसंयुक्तानेव धर्मान् प्रोचुः। प्राचीना ऋषयो महर्षयश्च शास्त्रानुसारमेव स्वजीवनं यज्ञमयमकुर्वन्। ते यज्ञैरेव6 स्वीयं जगतश्च कल्याणं चक्रुः। अतः सिध्यति यद्यज्ञेष्वपूर्वा काचिच्छक्तिर्विद्यते। यज्ञेन ये यत्किमपि लौकिकमलौकिकं वा सुखं वाञ्छन्ति तन्निश्चयेन प्राप्नुवन्ति। तदुक्तं कठोपनिषदि–

**'यो यदिच्छति तस्य तत्'** इति।

अत इदं स्पष्टं यदसारे खल्वस्मिन् संसारे न किमपि तादृशं वस्त्वस्ति यन्न यज्ञेन प्राप्तुं शक्येत। यज्ञेन न केवलमैहिकं धन–धान्य–सन्तत्यादिसुखमेव प्राप्यते, प्रत्युत पारलौकिकं मोक्षादिसाधनभूतसुखमपि प्राप्तुं शक्यत एव। यैर्यज्ञैः लोक लोकान्तराणां महत्त्वपूणर्णान्यिद्धतानि च मोक्षादिसाधनानि प्राप्यन्ते तेषां श्रौतयज्ञानां सर्वत्र प्रचारेण भवितव्यम्, येनास्माकं भारतवर्ष पुनः 'यज्ञीयदेशः' इत्यनेन गौरवास्पदेन शब्देन विभूषितं स्यात्। वेदोक्तानां यज्ञानां सम्यगनुष्ठानेनैव मानवजीवनं सुखमयं भवितुमर्हति, नान्यथा। ऋग्वेदस्येदं कथनं युक्तियुक्तमस्ति यत्

**रक्षति ब्रह्मेदं भारतं जनम्।**

अत्र ब्रह्मपदेन वेदमन्त्रस्य बोधो भवति। तदुक्तं शतपथश्रुतौ ब्रह्म वै मन्त्रः। अर्थाद् वेदमन्त्रस्य ज्ञानं भारतीयं जनं रक्षति।

अत्र पुनः प्रश्नः क्रियते यद् भारतादितरदेशेषु ये जनाः वसन्ति तान् कः रक्षतीति? तत्रोच्यते यद् भारतशब्दोऽत्र न केवलमस्य भारतदेशस्यैव वाचकः, अपितु विश्ववाचकोऽस्ति। यतो वेदे यत्र क्वचिदपि एतादृशाः शब्दाः प्रयुक्ताः सन्ति तेषामेकदेशीयं सङ्कुचितार्थो न विधातव्योऽपितु व्यापक एवार्थः स्वीकरणीयः। तेनेद सिद्धं यद् भारतशब्दस्तु । वरवरुप पाप विश्वे भारतखण्डनामके भूभागे एवैषा वेदपाठपरम्परा संस्कृतिर्वा जीवति तस्माद्वेदोक्तभारतशब्दात् साक्षात्सम्बन्धोऽनेन भारतदेशेन सह भवति। अत एव भारतदेशः पूर्व विश्वगुरुपदेन प्रतिष्ठित आसीत्, अद्याप्यस्त्येव परोक्षरूपेणेत्यलमतिविस्तरेण।

।। जय श्रीमन्नारायण ।।

# भारतीयसाहित्यस्य महानायकः कालिदासः – प्रो. गिरीश्वरमिश्रः

रामटेकः (डॉ. रेणुका बोकारे ) कविकुलगुरू कालिदास संस्कृत विश्वविद्यालये महाकवि कालिदास दिवसम् आधृत्य अद्य एकः विशेष कार्यक्रमः आयोजितः। तत्र अध्यक्षतां मा. कुलगुरु प्रो. हरेराम त्रिपाठी निरवहत् । मुख्यातिथिरूपेण प्रो. गिरीश्वर मिश्रः, पूर्वकुलपतिः, महात्मा गांधि-अन्ताराष्ट्रिय हिंदी विश्वविद्यालयः, वर्धा, सारस्वतातिथिरूपेण प्रो. महावीर अग्रवालः, पतंजलि विश्वविद्यालय-हरिद्वारस्य मा. कुलपतिः, केन्द्रीय संस्कृत विश्वविद्यालयप्रयागराजपरिसरस्य निदेशकः प्रो. ललित कुमार त्रिपाठी च उपस्थिताः। कुलसचिवः प्रो. कृष्णकुमार पांडेयः, संस्कृत भाषा-साहित्य विभागाध्यक्ष प्रो. कविता होले, रामटेक परिसरस्य निदेशकः प्रो. हरेकृष्ण अगस्ती, कालिदास दिवस समन्वयकः प्रो. पराग जोशी मंचे उपस्थिताः।





कार्यक्रमस्य आरंभः दीपप्रज्वलनेन जातः। विद्यार्थिनः सरस्वतीवन्दनाम। अकुर्वन् । प्रो. गिरीश्वर मिश्रः कालिदास दिवसस्य परंपरायाः इतिहासस्य च विषये स्वविचारान् प्रास्तौत् किया स कालिदास दिवसस्य अवसरे आयोजितेषु कार्यक्रमेषु एकं लघुचलच्चित्रम् अपि प्रस्तुतम्।

माननीयः कुलपति सारस्वतातिथिः प्रो. महावीर अग्रवालः स्वभाषणे कथितवान् यद् भारतीय वैदिक संस्कृतिः, परंपराः, जीवन मूल्यानि च महाकवि कालिदास साहित्ये द्रष्टुं लभ्यन्ते स महाकवि कालिदासस्य साहित्यं जीवने दर्शने च तदीय विचारान् प्रकटीकरोति । तेन सर्वे विषयाः प्रासादिकी सौन्दर्यमयी भाषायां प्रकटीकृताः। अहं कामनां करोमि यत् ता कविकुलगुरु कालिदासस्य भूमौ अयं विश्वविद्यालयः उत्तरोत्तर प्रगतिं कुर्यात्।

माननीय. प्रो.ललितकुमार त्रिपाठी कथितवान् कालिदासे लोक ज्ञानयोः समन्वयः विद्यते। सः आगमेन निगमेन च दर्शनेन प्रभावितः आसीत्।

माननीय. कुलपति प्रो. गिरीश्वर मिश्रः स्वभाषणे प्रसिद्ध हिंदी कवि नागार्जुनस्य कालिदास कवितां पाठितवान् सकालिदास भारतीय संस्कृतेः वाहकः कालिदास सार्वभौमिकः अस्ति। सः भारतीय साहित्यस्य महानायकः। तेन स्व भाषणे महाकवि कालिदासस्य अलौकिक प्रतिभायाः विभिन्न प्रेरणाः प्रस्तुताः। कालिदासस्य साहित्यं जीवनस्य सर्वान् अपि गुणान् स्पृशति।

अध्यक्षीय भाषणे मा. कुलपति प्रो. हरेराम त्रिपाठी कथितवान् यत् महाकवि कालिदासः भारतीयानां गौरवः। कालिदासः अस्मत् प्रेरणास्रोतः । यथा शब्दे अर्थे च समभाव संबंधः तथा कालिदासेन शिवपार्वत्योः एकता व्याख्याता। महाकवि कालिदास दिवसस्य अवसरे विश्वविद्यालयेन कविकुलगुरु कालिदासस्य साहित्ये विश्वविद्यालयस्य योगदानम् आधृत्य कालिदासविशेषांकस्य प्रकाशनं जातम्। विश्वविद्यालयस्य त्रैमासिक वैदर्भ्याः 25 तमः अंकोऽपि प्रकाशितः द्वयोरपि संपादनं जनसंपर्क अधिकारी डॉ. रेणुका बोकारे अकरोत् । कार्यक्रमस्य संचालनं डॉ. राकेश रोशन एवं च धन्यवाद समर्पणं समन्वयकः प्रो. पराग जोशी कृतवान्।

## नन्दीघोषे जगन्नाथः कृष्णहस्ती विराजते


प्रो. बनमाली बिश्वाल:

नेत्रोत्सवदिने देवास्सम्प्राप्य नवयौवनम्।
मातृस्वसृगृहं गन्तुं सन्ति समुत्सुकाः पुनः॥
दैवीं लीलामपूर्वान्तां लोकेषु विरलां त्रिषु।
देवा लालायिता द्रष्टुं यात्रा-त्रय-समन्विताम्॥
स्नानयात्रा-समारम्भा घोषयात्रा-सुमध्यमा।
बाहुडान्ता त्रियात्रैषा रथयात्रा महीयते॥
आषाढस्य द्वितीयायां शुक्लपक्षे शुभेहनि।
पहण्डिविधिना देवा मुदा यान्ति रथान् प्रति॥
कृष्ण-पीतमये दिव्ये गरुडे शिखरारूढे।
नन्दीघोषे जगन्नाथः कृष्णहस्ती विराजते॥
नील-रक्त-मये भव्ये ताड-वृक्ष-समङ्किते।
तालध्वजरथारूढो बलभद्रस्तदग्रजः॥
कृष्ण-रक्त-मयेन्यस्मिंश्चार्जुने सारथीकृते।
सुभद्रा राजते मध्ये दर्पदलनसंज्ञिते।2॥
स्वयं गजपतिर्यत्र सेवाकार्ये नियोजितः।
स्वर्णसम्मार्जनीं नीत्वा स्वच्छीकर्तुं रथांश्च तान्॥
घण्टामर्दल-नादैस्ते सुभक्तैः परिवेष्टिताः॥
यान्ति देवाः रथारूढाः गुण्डिचामन्दिरं प्रति॥
रथस्थं रथयात्रायां रथिनं यश्च पश्यति।
पूर्यन्ते रथवेगेन तस्य मनोरथास्समे॥
रथे स्थित्वा जगन्नाथः स्वस्य रथं न पश्यति।
रथमाकर्षतो भक्तान् सानन्दमवलोकति॥
रथं विना जगन्नाथः पदमेकं न गच्छति।
भक्तस्कन्धान् समारुह्य रथमारोहति मुदा॥
रथमारोहयत्यादौ भ्रातरं भगिनीं पुनः।
ततो लीलामयो लीलां कृत्वोपविशति स्वयम्॥

## काव्यापगासीकराः

-डॉ. प्रीति आर. पुजारा
सहायकाचार्या, संस्कृतविभागः
डी.सी.एम. कला-वाणिज्यमहाविद्यालयः
वीरमगाम-अहमदाबाद- गुजरात

ये शम्भोः शिवकेशपाशलुलितामन्दाकिनीपुत्रकाः
ये स्निग्धाश्चपलाः कवीन्द्रहृदयानुन्मादयन्ति स्वयम्।
प्रीतास्सन्ति सदा विलाससदने ये शारदायाः शुभे
ते सिञ्चन्तु सदैव शान्तिसलिलं काव्यापगासीकराः ॥१॥
ये गीर्वाणसुधारसैः सुमधुरैः संतोषयन्तो मनः
ये मे चित्तवनं विचारविभवैः संमार्जयन्तो नवैः।
येषां स्निग्धमधुच्युतैर्जलकणैः संजाग्रता चेतना
ते सिञ्चन्तु सदैव शान्तिसलिलं काव्यापगासीकराः ॥२॥
ये स्निग्धा रसनिर्भरा ऋतिहराः संवेदनावाहकाः
स्प्रष्टुं यानतिविह्वलाः कविवरा भावोज्ज्वलाः कोविदाः।
येषां स्निग्धजलं ददाति परमां शान्तिं मनोनन्दिनीं
ते सिञ्चन्तु सदैव शान्तिसलिलं काव्यापगासीकराः॥३॥
ये चित्वा कवितविलाससमधुपान्तेषां हृदि प्रत्यहं
बीजं च प्रतिभाप्रदं नवनवं संरोपयन्तो मुदा।
येषां स्निग्धजलैः फलन्ति हरिताः काव्यद्रुमा भूतले
ते सिञ्चन्तु सदैव शान्तिसलिलं काव्यापगासीकराः॥४॥
देवानामपि या नदी प्रियतरा गङ्गैवपुण्यप्रदा
विख्याता कविताझरी क्षितितले सञ्जीवनी नूतना।
यस्याः प्रीतिरसायनं सुखकरं संगृह्यते सीकरैः
ते सिञ्चन्तु सदैव शान्तिसलिलं काव्यापगासीकराः॥५॥

## वर्षर्तुविभा


डॉ. सिंहासनपाण्डेयः
देवरिया

अद्यत्वे जलदागमो विहरते भूयोऽम्भसा संयुतो
वृष्ट्या तेन सरोवराश्च सरितः सम्प्लाविता मेदिनी।
मोदन्ते कृषकास्तदीयवनिताश्शस्यप्ररोहादहो
तन्वानश्च सुरम्यतां प्रतिदिशं सा चाषाढमासोऽधुना ॥ 1
वर्षर्तौ नभसि प्रकामनिविडां कादम्बिनीं श्यामलां
दृष्ट्वाथ प्रमुदं भजन्ति कृषका वृष्ट्यागमप्रत्ययात् ।
ये केचित्तु वनेषु सन्ति शिखिनो हृष्यन्ति नृत्यन्ति वा
सम्प्रत्यादिवसं तमस्तु सुतरां व्याप्नोति सर्वा दिशः ॥2
एतस्मिञ्शुचिमासयुक्तसमये त्वम्भोमुचां गर्जितञ्
श्रुत्वैषा परिवेपमानवनिताश्लिष्य प्रियं संस्थिता ।
पातं वीक्ष्य च विद्युतः किल समे भीत्यन्विताः प्राणिनः
प्रायः सर्वजना विहाय निखिलं
गेहश्रितास्सत्वरम् ॥3
प्रातर्वृष्टिरभूदहोऽद्य कृषकाः केदारभागं गता
धान्यारोपविधिः कथञ्चिदपि वा नूनं त्वसौ जायता
मेतत्कार्यधिया च ते श्रमजुषः सर्वं सहन्ते मुदा।
मध्याह्ने कठिनातपातिशयतः प्रस्वेदगात्रा अपि ॥ 4
धन्येयं धरणी यदत्र महिला ग्राम्याः किशोर्यस्तथा
धान्यारोपरताः समेत्य सकला गायन्ति गीतं सुखम्।
वृक्षच्छायमधिश्रयन्ति सघनं क्लान्ताश्च भूस्वामिनः
किन्त्वेताः श्रमशीलमोदवदना नार्यः प्रणम्याः सदा ॥ 5

(१)

## कौशिकी ( कोसीनदी ) संस्तवः!


-डॉ. अरविन्दकुमारतिवारी

विहारे नेपालात् सलिलमतुलं हाऽनयसि मे
तटस्थान् निघ्नन्ती द्रुतमिह जलैः रावयसि वा।
अहो! रौद्रं रूपं जननि! लभसे कौशिकि! कथं
स्वपुत्राणां वासं हरति कुपिता नैव जननी॥ १
वदन्ति त्वां सत्यं विमलचरिताः शोकसरितं
वहन्ती चोन्मत्ता गणयसि कथं नो विलपतः।
जनान् सर्वान् क्षुब्धे! प्रलयरचनां हा सृजसि किं
स्वपुत्राणां वासं हरति कुपिता नैव जननी ॥ २
ऋषीणां बुद्धानां भुवि जिनमतानां वसुमती
विहारो विख्यातो मुनिदिविषदामाश्रम इति।
इदं जानाना त्वं दयस इव नो कौशिकि! नदि!
स्वपुत्राणां वासं हरति कुपिता नैव जननी॥ ३
समीपस्थान् लोकान् कथमवसि नो मातरधुना
निमग्नान् हाऽनन्तान् जननि! च पशून् हन्त मनुजान्।
विनष्टं शस्यं वा तव सलिलधारासु बहुशः
स्वपुत्राणां वासं हरति कुपिता नैव जननी ॥ ४
कुटीरं लोकानां नयसि परुषे! दूरमहहा!
जनान् दूनान् दृष्ट्वा प्रलयरचनां संसृजसि किम्?
तवायं किङ्क्रोधो दहति न विहारं गतधनं
स्वपुत्राणां वासं हरति कुपिता नैव जननी॥ ५
तवायं चाक्रोशो रचयति विनाशं दिशि दिशि
परं दर्शं दर्शं द्रवति हृदयं ते न समये।
विहारं पाह्येवं मुनिचरणपूतं जननि! मे
स्वपुत्राणां वासं हरति कुपिता नैव जननी॥ ६
घनस्ते साहाय्यं कुरुत इव पश्यन्ति मनुजा
निरीहा बन्धे वा पुलिनरचिते हन्त शिविरे।
विना भोज्यं रात्रिं दिनमिव नयन्तीव विनताः
स्वपुत्राणां वासं हरति कुपिता नैव जननी ॥ ७
जनानां संहारं कुरुष इव धिक् त्वां गतदयां
नदीनां नाम्ना त्वं मनुजकुलहन्त्री मम मतम्।
विहारं चापन्नं विगतविभवं रक्ष विकलं
स्वपुत्राणां वासं हरति कुपिता नैव जननी॥ ८

(२)

## निद्रा नवोढोपमा!

प्रातर्मुञ्चति नैव मां प्रतिदिनं षड्वादने काप्यसौ
कर्तुं दत्त इयं न कार्यदशकं मध्याह्नकालात्परम्।
किं कुर्या निगदन्तु हे कविवराः! रात्रौ शनैरागता
शीघ्रं विष्टरमागतं स्पृशति मां निद्रा नवोढोपमा!! १
सस्नेहं भुजयोर्निधाय ललना श्रान्तं प्रसुप्तं कविं
गानं संस्कृतमद्भुतं सुमधुरं गायन्त्यहो कामिनी।
मन्ये चुम्बति संस्पृशन्त्यविरतं निर्व्याजमेवाननं
तूर्णीं विष्टरमागतं हरति मां निद्रा नवोढोपमा॥ २
नो जाने परमोपकारमनिशं कस्मादियं कुर्वती
जेतुं कञ्चिदहो सदा प्रयतते भावैर्मुदा सात्त्विकैः।
शून्यं वासगृहं मदीयमचिरं दृष्ट्वा हृदोपस्थिता
पूता विष्टरमागतं नमति मां निद्रा नवोढोपमा॥ ३
पादं संवहते कदाचिदभयं संस्फोटयन्त्यङ्गुलीः
सद्यो हन्त करेण धूर्तमशकं संवारयन्ती शनैः।
वायुं चापि करोति निर्मलमती रोमाञ्चिता सेविका
मित्रं विष्टरमागतं भजति मां निद्रा नवोढोपमा॥ ४
रुष्टा दूरमहो करोति सहसा मे लेखनी लेखनात्
पर्यङ्के कुपिता कवीन्द्ररचितं काव्यं मनोरञ्जकम्।
केशान् मे बहुधा स्पृशन्त्यवितथं सन्दर्शयन्ती दशां
स्वप्ने विष्टरमागतं गदति मां निद्रा नवोढोपमा॥ ५
संसारो रचितः श्रुतस्तु विधिना स्वार्थैः परं मन्यते
सर्वं स्वार्थमयो जनः परमियं निस्स्वार्थरूपा प्रिया।
सानन्दं शयने निपत्य शमनी सर्वापदां मादृशां
नम्या विष्टरमागतं चरति मां निद्रा नवोढोपमा॥ ६
अश्रान्ता तमसावृतापि विमला माया मनोज्ञा शुभा
स्वाङ्के प्राणिकुलं निधाय मुदिता शेतेऽथवा सेवते।
सर्वान् भावयते न सा भुवि जनं जानन्तु हे सज्जनाः!
धन्या विष्टरमागतं श्रयति मां निद्रा नवोढोपमा॥ ७
आयाता मम लोचने मुहुरियं मन्येऽङ्गुलिस्पर्शनैः
दृष्टिं वारयतीह साग्रहमहो हृद्भावनोल्लेखनात् ।
एषा कापि मनोरमा सुरमणी सम्मोहयन्त्युत्तमा
वन्द्या विष्टरमागतं वदति मां निद्रा नवोढोपमा॥ ८

## नगरावलोकनम्


डॉ० निरञ्जन मिश्रः

दृष्टं मयाद्य नगरं चिरचिन्तितं यत्
द्रष्टुं भवन्ति विकला वसतौ वसन्तः।
तान् दर्शयामि पदबन्धनकैतवेन द्रष्टुं
तथापि किम् तेऽत्र भवन्ति सज्जाः ॥1॥

नास्तीह पल्लवचयस्तु महीरुहाणां
गीतध्वनिर्न गगने विविधाण्डजानाम् ।
कूपे कलं न तरुणीकरकंकणानां
कर्णे श्रुतिर्नहि गवां गलघण्टिकानाम् । ।2॥

सन्त्यत्र भव्यभवनानि धनेश्वराणां
विस्फोटकध्वनिबलं नववाहनानाम्।
मार्गे सदैव कलहो दुरिताशयानां
गेहे तथाश्रुघनवर्षणमातुराणाम् ।।3॥

नास्त्यत्र मित्रघटनं मधुराक्षरेण
प्रीतिर्न चात्र कुलगौरवचित्रणेन ।
कान्तालालाटतिलके नहि कान्तभाग्यं
पुत्रः कदापि वहतीह न पितृदास्यम् । ।4॥

अत्रामृतस्य वदने गरलस्य वासो
भ्रातृत्वबन्धनमिषाद्धि रिपोर्विलासः।
कान्तेतरेण रतिरागवती हि कान्ता
पश्यन्ति वृद्धपितरं स्वगृहे न पुत्राः ।।5॥

नास्तीह बन्धुजनवाक्कलहप्रवृत्ते-
रन्ते मनोव्रणविरोषणतत्परत्वम् !
अत्रास्ति मौनविधिनैव समस्तघातं
कृत्वा व्रणे लवणवारिनिषेकवृत्तिः । ।6॥

नास्तीह मातृमुखचुम्बनमुग्धबालो
नो वा दरिद्रजनपालकभूमिपालः ।
अस्तीह कुक्कुरविचुम्बनमुग्धबाला
सर्वेश्वरीह विमला तरुणी च हाला। ।7॥

नास्तीह बालरविदर्शनपुष्टदृष्टि-
र्नो वा चकोरहितकृच्छशिपादवृष्टिः ।
अत्रास्ति शीर्णपललाशनपुष्टपत्री
दीनार्जिताहरणधर्मधरस्तपस्वी । ।8॥

नास्तीह निर्मलरसस्नपनस्य भाग्यं
नो वा प्रफुल्लकुसुमाननमुग्धहास्यम् ।
अस्तीह चौषधरसग्रहणप्रवृत्ति-
र्निर्माल्यगन्धचयने रसनाविवृत्तिः ।।10॥

## तस्मै श्रीगुरवे नमः


डॉ.शशिकान्ततिवारी
'शशिधरः'

सन्मार्गं दर्शयित्वा मे कल्याणं साधितं सदा।
विद्यया शिक्षया येन तस्मै श्रीगुरवे नमः॥01॥
किं सेव्यं किमसेव्यं किं ग्राह्यं त्याज्यञ्च किं मया।
नित्यं सम्बोधितं येन तस्मै श्रीगुरवे नमः॥02॥
दत्वा पुत्रसमं स्नेहं मह्यं शिष्याय सर्वदा।
शिवं सञ्चिन्तितं येन तस्मै श्रीगुरवे नमः॥03॥
पोषितो विद्यया नित्यं स्नापितो ज्ञानधारया।
सदाहं रक्षितो येन तस्मै श्रीगुरवे नमः॥04॥
जीवनं मूल्यहीनं मे स्वर्णवन्मूल्यवत्कृतम्।
सूर्यचन्द्रसमं येन तस्मै श्रीगुरवे नमः॥05॥
संसारो रक्षितो येन पालितश्च लयीकृतः।
तल्लीला ज्ञापिता येन तस्मै श्रीगुरवे नमः॥06॥
आयातोस्मि कुतः कुत्र पुनः यास्याम्यहं ध्रुवम्।
किं लक्ष्यं ज्ञापितं येन तस्मै श्रीगुरवे नमः॥07॥
पराविद्यापराविद्या गुह्यविद्याप्यहो हृदा।
दत्ता मह्यं सदा येन तस्मै श्रीगुरवे नमः॥08॥
स्वशिष्यबुद्धिवर्धकं सुमार्गसत्यदर्शकं
सुरम्यशिक्षणप्रणालिकाविकासकारकम्।
विधातृरूपशाश्वतं जगत्प्रणम्यभास्करं
नमामि सद्गुरुं प्रियं नमामि पूज्यशिक्षकम्॥

# चामुण्डाशतकम्



सर्वेशकुमारमिश्रः

दुर्गे! मातश्चण्डि! कालि! हे श्रद्धे! भवतारिणि!
अम्ब! शक्ते! महादेवि! बलं बुद्धिं प्रदेहि मे।।१।।

संसारे जनने दुःखं मृतौ दुःखं तथा पुनः।
आनन्दो वत्सले! देवि! तव पादाम्बुजद्वये।।२।।

मायां मोहं परित्यज्य तिष्ठामि तव सम्मुखे।
आनन्दं देहि मे मातर्ब्रह्मानन्दस्वरूपिणि!।।३।।

मया जन्मानि लब्धानि ब्रह्मवंशे यदा तदा।
शान्तिः प्राप्ता मया देवि! तव पादाम्बुजद्वये।।४।।

मया जन्मानि लब्धानि क्षत्रवंशे यदा तदा।
शक्तिः प्राप्ता मया देवि! तव पादाम्बुजद्वये।।५।।

सम्बन्धः क्षणिको देवि! मायिके! जगदम्बिके!।
संसारेऽस्मिन् च निःसारे तस्मान्मामुद्धराम्बिके!।।६।।

दैवी भागवती श्रद्धा श्रद्धा या विद्यते हृदि।
सा जन्मातरपुण्यानां फलमेव पराम्बिके!।।७।।

रतिरेषा मया प्राप्ता चरणे तव चण्डिके!।
सा लोकान्तरपुण्यानां फलमेव महेश्वरि!।।८।।

सर्वमङ्गलमाङ्गल्ये! पुण्ये! श्रद्धे! शिवे! स्वधे!।
रूपं दत्तं यशो दत्तं जयो दत्तो द्विषो हताः।।९।।

शिवदूति! महाकालि! कालरात्रि! नमोऽस्तु ते।
चञ्चलं मे मनो देवि चरणे वै नियुज्यताम्।।१०।।

पादपद्मे सुखं देवि! शान्तिस्ते चरणे सदा।
आकरः सर्वविद्यानां पादे तव सुशोभते।।११।।

शान्तिः कान्तिर्महादेवि! स्वर्गो मोक्षो महीयते।
सर्गस्थितिविनाशानां दर्शनं चरणे तव।।१२।।

महामाये! महादेवि! विद्यादात्रि! नमोऽस्तु ते।
आनन्दं देहि मे मातर्जगदानन्दरूपिणि!।।१३।।

आनन्दो ब्रह्म हे मातर्वेदान्तेनोच्यते सदा।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।१४।।

त्रिनेत्रे! हे महादुर्गे! शशिधरे! पराम्बिके!
तमानन्दं तमानन्दं तमानन्दं विधेहि मे।।१५।।

सिंहस्कन्धस्थिते! देवि! कात्यायनि! नमोऽस्तु ते।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।१६।।

किरीटिनि! महावज्रे! ह्यम्बिके! नयनोज्ज्वले!
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।१७।।

हंसासनसमायुक्ते! सरस्वति! नमोऽस्तु ते।
कदानन्दं कदानन्दं कदानन्दं विधास्यसि?।।१८।।

चामुण्डे! हे महाविद्ये! शिरोमाल्यविभूषिते!
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।१९।।

चामुण्डे! हे महाकालि! हतदैत्यमहाबले!।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।२०।।

महावज्रे! महारात्रे! घोररूपे! सनातनि!।
विश्वाधारे! महाधारे! नारायणि! नमोऽस्तु ते।।२१।।

वत्सले! देवि! चामुण्डे! महावृषभवाहिनि!।
भक्तस्यार्तिहरे! देवि! दुर्गे! देवि! नमोऽस्तु ते।।२२।।

स्वर्गदे! मोक्षदे! देवि! परिणामप्रदायिनि!।
ऐन्द्रि! देवि! महामाये! सर्वभूते! नमोऽस्तु ते।।२३।।

शक्तिभूते! तु चामुण्डे! धनधान्यप्रदायिनि!।
इन्द्रशक्ते! महाविद्ये! महारावे! नमोऽस्तु ते।।२४।।

वज्रहस्ते! गदाहस्ते! सहस्रनयनोज्ज्वले!
हे कमलासने! देवि! नारायणि! नमोऽस्तु ते।।२५।।

दुर्गेऽनघे! तु चामुण्डे! विश्वरूपनिवासिनि!।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।२६।।

शुभेऽशुभे! महारौद्रे! दैत्यदर्पविनाशिनि!।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।२७।।

रोषात्त्वं रोगदे देवि! तोषाद् रोगविनाशिनि!।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।२८।।

शैलपुत्रि! महादेवि! लोचनत्रयभूषिते!।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।२९।।

श्वेताम्बरे! महाविद्ये! ब्रह्माणि! परमेश्वरि!।
हंसयुक्तविमानस्थे! विद्यादेवि! नमोऽस्तु ते।।३०।।

विन्ध्येश्वरि! महामाये! ज्वालादेवि! नमोऽस्तु ते।
अपर्णेऽनेकवर्णे! च चन्द्रघण्टे! नमोऽस्तु ते।।३१।।

ब्रह्मचारिणि! हे देवि! कात्यायनि! नमोऽस्तु ते।
सर्वशक्तिधरे! देवि! सत्याख्ये! हे नमोऽस्तु ते।।३२।।

रोगहन्त्रि! पापहन्त्रि! ह्यस्मद्वैरिविनाशिनि!।
सर्वपापहरे! देवि! साध्वि! देवि! नमोऽस्तु ते।।३३।।

सर्वस्वरूपे! चामुण्डे! वनमाल्यधरेऽनघे!।
श्वेताम्बरे! महादेवि! भवप्रीते! नमोऽस्तु ते।।३४।।

चक्रशूलधरे! देवि! प्रतिलोमनिवासिनि!।
सर्वक्लेशहरे! देवि! भवान्यै ते नमोऽस्तु ते।।३५।।

भवमोचनि! हे मातरार्ये! दुर्गे! नमोऽस्तु ते।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।३६।।

करमालाधरे! देवि! हंसासने! नमोऽस्तु ते।
रक्तबीजवधे! देवि! जये! देवि! नमोऽस्तु ते।।३७।।

रुण्डमालाधरे! देवि! मुण्डमाले! नमोऽस्तु ते।
पीताम्बरधरे! देवि! रक्ताम्बरे! नमोऽस्तु ते।।३८।।

कमण्डलुधरे! देवि! पानपात्रधरे! शिवे!।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।३९।।

तप्तकाञ्चनवर्णाभे! तप्तकाञ्चनभूषणे!।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।४०।।

विशाललोचने! कालि! महामारि! नमोऽस्तु ते।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।४१।।

महामाये! महाकालि! महामारि! क्षुधे! तृषे!।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।४२।।

निद्रे! तृष्णे! महावीर्ये! कालरात्रि! नमोऽस्तु ते।
दुरत्यये! महारूपे! दक्षयज्ञविनाशिनि!।।४३।।

अक्षमालासमायुक्ते! वीणापुस्तकधारिणि!।
कौशाम्भःक्षरिके! देवि! दिव्यशक्तिं प्रदेहि मे।।४४।।

भारति! हे महाकालि! दिव्यरूपं प्रदेहि मे।
ज्वालामालाङ्किते! दिव्ये! चण्डमुण्डविनाशिनि!।।४५।।

सर्वस्याद्ये! महालक्ष्मि! धनं धान्यं प्रदेहि मे।
दृश्यादृश्यस्वरूपे! च दुर्गे! देवि! नमोऽस्तु ते।।४६।।

नागलिङ्गधरे! देवि! च्छिन्नमस्ते! नमोऽस्तु ते।
दिव्यनेत्रधरे! देवि! ह्याद्ये! देवि! नमोऽस्तु ते।।४७।।

शूलधारिणि! हे दुर्गे! त्रिनेत्रे! बलदे! शिवे!।
चण्डघण्टे! महादेवि! पिनाकधृतहस्तके!।।४८।।

चित्रे! देवि! महादुर्गे! चित्तरूपे! तपस्विनि!।
स्वर्गापवर्गदे! देवि! धूम्रलोचनघातिनि!।।४९।।

अहंकारमनोबुद्धिचित्तवृत्तिविकासिनि!।
निराधारे! निराकारे! शुभरूपे! नमोऽस्तु ते।।५०।।

पूर्णेऽनन्ते! महादुर्गे! सत्यानन्दस्वरूपिणि!।
सदानन्दं सदानन्दं सदानन्दं प्रदेहि मे।।५१।।

भाविनि! देवि! चामुण्डे! भव्याभव्ये! सदागते!।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।५२।।

काव्यादेवि! महाकालि! महादुर्गे! नमोऽस्तु ते।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।५३।।

मणिरत्नधरे! देवि! चिन्ते! देवि! नमोऽस्तु ते।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।५४।।

शाम्भवि! देवि! चामुण्डे! देवमातर्नमोऽस्तु ते।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।५५।।

सर्वविद्ये! महाविद्ये! चामुण्डे! भवतारिणि!
कदानन्दं कदानन्दं कदानन्दं विधास्यसि?।।५६।।

दुर्गेश्वरि! महादुर्गे! दैत्यदर्पविनाशिनि!।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।५७।।

हेमे! हेमवति! देवि! विन्ध्याचलनिवासिनि!।
कदानन्दं कदानन्दं कदानन्दं विधास्यसि?।।५८।।

पट्टाम्बरपरीधाने! चामुण्डे! घोररूपिणि!।
अमेयविक्रमे! मातः! कालरात्रि! नमोऽस्तु ते।।५९।।

सदा विष्णुप्रिये! देवि! ह्यक्रूरे! क्रूरनाशिनि!।
वनदुर्गे! महादुर्गे! वारं वारं नमोऽस्तु ते।।६०।।

विन्ध्येश्वरि! सदानन्दे! हतमुण्डे! महेश्वरि!।
मातङ्गिनि! महानन्दे! मतङ्गमुनिपूजिते!।।६१।।

स्वाहे! स्वधे! महास्वाहे! महास्वधे! पराम्बिके!।
कदानन्दं कदानन्दं कदानन्दं विधास्यसि?।।६२।।

ब्रह्मस्वरूपे! ब्रह्मज्ञे! महेश्वरि! नमोऽस्तु ते।
लक्ष्मि! लज्जे! महापद्मे! नमस्तेऽस्तु पुनः पुनः।।६३।।

अग्निज्वाले! महाज्वाले! प्रेतबाधाविनाशिनि!।
शुभानन्दं शुभानन्दं शुभानन्दं प्रदेहि मे।।६४।।

बहुले! बहुलप्रीते! सर्ववाहनवाहने!।
सुखानन्दं सुखानन्दं सुखानन्दं प्रदेहि मे।।६५।।

आयुर्दे! प्राणदे! देवि! शक्तिदे! भगवत्प्रिये!।
मुक्तिदे! भुक्तिदे! मातः! संसारोद्धारकारिणि!।।६६।।

विष्णुमाये! परामाये! महिषासुरमर्दिनि!।
सर्वशास्त्रप्रिये! सत्ये! दानहस्ते! नमोऽस्तु ते।।६७।।

अप्रौढे! चैव प्रौढे! च वृद्धमातर्नमोऽस्तु ते।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।६८।।

धर्मदे! कामदे! शुभ्रे! ह्यर्थदे! मोक्षदे! प्रिये!।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।६९।।

महिषान्तकरि! देवि! धनधान्यप्रवर्द्धिनि!।
नवदुर्गे! महादुर्गे! ब्रह्मज्ञानं प्रदेहि मे।।७०।।

कालकाले! महाकालि! कालके! बुद्धिदे! सदा।
ऋद्धिदे! सिद्धिदे! मातर्वरदेऽभयदायिनि!।।७१।।

चण्डमुण्डविनाशिनि! दुर्गदानवघातिनि!।
महिषासुरविध्वंसे! सर्वशक्तिस्वरूपिणि!।।७२।।

दुर्गे! देवि! नमोऽस्तु ते कृष्णस्वसर्नमोऽस्तुते।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि।।७३।।

महावीर्ये! महाज्योतिर्दिव्यशक्तिस्वरूपिणि!।
महाम्ब! देवि! चामुण्डे! कदानन्दं प्रदास्यसि?।।७४।।

घोरेऽनघे! महारावे! दुष्टताण्डवनाशिनि!।
मुक्तिप्रदे! महागौरि! साक्षाद्धर्मस्वरूपिणि!।।७५।।

सर्वाश्रयेऽखिले! मातः! साक्षात् शक्तिस्वरूपिणि!।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।७६।।

शङ्खचक्रधरे! देवि! त्रिशिखे! परमात्मिके!।
कामदे! सिद्धिदे! देवि! सर्ववैभवदायिनि!।।७७।।
दुर्गनाशिनि! चामुण्डे! नरजन्मप्रदायिनि!।
शाकम्भरि! महामाये! कलमञ्जीररञ्जिनि!।।७८।।

महारौद्रे! महाघाते! सर्वबाधाविनाशिनि!।
गगनस्थे! महादेवि! वैकुण्ठविनिवासिनि!।।७९।।

चामुण्डे! हे महारौद्रे! भुक्तिमुक्तिप्रदायिनि!।
दिव्यशक्ते! महाशक्ते! क्लेशबाधाविनाशिनि!।।८०।।

महादुर्गे! महाकालि! हिमाद्रिविनिवासिनि!।
महानन्दं महानन्दं महानन्दं प्रदेहि मे।।८१।।

जगन्मातर्महामातः! सौम्ये! शोभे! महामुखि!।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।८२।।

कालातीते! महाकाले! नानाशास्त्रकरे! रमे!
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।८३।।

अमलेऽगोचरे! देवि! पुण्यपूर्णे! भयापहे!।
महाविलासदे! देवि! गङ्गातटनिवासिनि!।।८४।।

मूलाधारस्थिते! देवि! भेदाभेदप्रकाशिनि!।
कलाधारे! महाधारे! परधामनिवासिनि!।।८५।।

रक्तबीजहरे! देवि! गलमालाविभूषिते!।
भवभामिनि! चामुण्डे! जगन्मातर्नमोऽस्तु ते।।८६।।

चण्डमुण्डहरे! देवि! कर्मबाधाविनाशिनि!।
दशविद्येऽमले! देवि! स्वाहां स्वाहां करोम्यहम्।।८७।।

मधुकैटभविध्वंसे! राधे! सीते! महाप्रिये!
स्वाहे! स्वाहे! महास्वाहे! स्वाहां स्वाहां करोम्यहम्।।८८।।

रक्ताम्बरे! महारक्ते! शूलशक्तिसमन्विते!।
सौम्ये! रौद्रे! महारावे! सर्वेशस्त्वां भजाम्यहम्।।८९।।

खड्गशूलधरे! देवि! कूष्माण्डे! धनदायिनि!।
चण्डिके! देवि! चामुण्डे! नैनादेवि! नमोऽस्तु ते।।९०।।

विश्वमोहिनि! चामुण्डे! पाशाङ्कुशधरेऽनघे!।
ब्रह्मस्तुते! महाविद्ये! दीपज्योतिःप्रकाशिनि!।।९१।।

विश्वरूपे! महारूपे! कालकालस्वरूपिणि!।
हृत्पुण्डरीकमध्यस्थे! प्रातःसूर्यसमप्रभे!।।९२।।

भवबाधाहरे! देवि! कालीखोहनिवासिनि!।
महाकालि! महालक्ष्मि! महाविद्ये! नमोऽस्तु ते।।९३।।

वियदीकारसंयुक्ते! वीतिहोत्रसमन्विते!।
वाङ्मये! मोहमाये! च। परानन्दे! नमोऽस्तु ते!।।९४।।

जगदम्ब! महादुर्गे! तापत्रयविनाशिनि!।
सदानन्दे! महानन्दे! नन्दे! देवि! नमोऽस्तु ते।।९५।।

सौभाग्यारोग्यदे! देवि! पापतापविनाशिनि!।
तमानन्दं तमानन्दं तमानन्दं प्रदेहि मे।।९६।।

ऐश्वर्योत्पत्तिदे! देवि! मृत्युदे! स्थितिकारिणि!।
पुत्रदे! जन्मदे! देवि! पुत्रशोकविनाशिनि!।।९७।।

सर्वार्थसाधिके! देवि! शक्तिभूते! सनातनि!।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।९८।।

शरण्ये! त्र्यम्बके! दुर्गे! भक्तानां हृदये स्थिते!।
कदानन्दं कदानन्दं कदानन्दं प्रदास्यसि?।।९९।।

शिवलोकस्थिते! देवि! ब्रह्मलोकनिवासिनि!।
शेषशय्यास्थिते! मातः! सदानन्दं प्रदेहि मे।।१००।।

चामुण्डाशतकं देवि मया प्रोक्तं महेश्वरि!।
ये पठन्ति नरा भक्त्या तेषां चण्डी प्रसीदति।।१०१।।

तत्सदिति वत्सगोत्रोत्पन्नेन पार्वतीत्रिभुवननाथपुत्रेण सर्वेशकुमारमिश्रेण विरचितं चामुण्डाशतकं सम्पूर्णम्।

# श्रीमाधवदेशपाण्डेसमभिनन्दनसमारोहो माधवमहिमग्रन्थलोकार्पणञ्च

-ऋषिराजपाठकः

१४.७.२०२४ ई. तमे दिनाङ्के भारतीयसमयानुसारेण सायं ७:००तः रात्रौ ९:०० पर्यन्तम् अन्तर्जालमाध्यमेन देववाणी-परिषद्, दिल्ली-वैदिक-गणयोः संयुक्ततत्त्वावधाने आचार्यमाधवदेशपाण्डेवर्याणां समभिनन्दनसमारोहः 'माधवमहिमा' (आचार्यमाधवदेशपाण्डेसमभिनन्दनग्रन्थः) इत्यस्य ग्रन्थस्य च लोकार्पणोत्सवः समनुष्ठितः।

श्रीदण्डपाणिना आचार्येण कृतेन मङ्गलाचरणेन प्रारब्धेऽस्मिन् समारोहे डॉ श्रीसुबोधकुमारमिश्रभागवतीमहोदयेन (असमप्रदेशीयवैदिकगणप्रतिनिधिना) स्वागतगीतं गीतम्। एतदनु देववाणीपरिषदध्यक्षेण श्रीमदभिनवशुक्लेन स्वागत- भाषणं प्रस्तुतम्। तदनु माधवमहिमग्रन्थसम्पादनपरिकल्पनापूर्वकं देववाणी-परिषन्महासचिवेन ऋषिराजपाठकेनोक्तं यदाचार्यरमाकान्तशुक्लवर्याणामियं कामनाऽऽसीद् यद् आचार्याणां माधवदेशपाण्डेवर्याणां समभिनन्दनग्रन्थः प्राकाश्यं यातु तेनेदमपि प्रत्यपादि यदस्य ग्रन्थस्य 'माधवमहिमा' इति नामधेयमपि आचार्यरमाकान्तशुक्लवर्येण कृतमासीत्। अद्य एतद्ग्रन्थलोकार्पण- पूर्वकमाचार्यमाधवदेशपाण्डेवर्याणामभिनन्दनसमारोहः समनुष्ठीयते अतो देववाणीपरिषत् प्रसादमनुभवति इति ऋषिराजपाठकेनोक्तम्। एतदनु श्रीवत्सदेशराजशर्मणा सम्पादकीयभाषणं प्रस्तुतम्। सुधीमाधवप्रशस्तिपाठश्च श्रीदण्डपाणिना कृतः।

श्रीमदरविन्दकुमारतिवारीवर्येण माधवमहिमग्रन्धस्य सविस्तरं संस्तवः स्तुतः। तेन माधवमहिमग्रन्थस्य प्रत्यध्यायं समीक्षणपूर्वकं श्रीमाधवदेशपाण्डे- वर्यकृतानां कवितानामपि सम्यगनुशीलनं कृतम्।

तद्नु वैदिकगणश्लोकशल्यचिकित्सकेन कल्लिडै कुरिच्चि विश्वनाथन् कृष्णन् इत्यनेन विद्वद्भाषणं कुर्वता श्रीमाधवदेशपाण्डेवर्यस्य शास्त्रीयमवदानं चर्चितम्। अमेरिकास्थहार्वर्डविश्वविद्यालयात्समागतया डॉ. राधा ब्लिण्डरमन् इत्यनया पद्यमुखेन श्रीमाधवदेशपाण्डेवर्यस्तुतिः कृता। डॉ. माणिकठकारः श्मम भ्राताश इति विषयं समाश्रित्य माधवदेशपाण्डेवर्यविषये न्यगादीत्।

मुख्यातिथिरूपेण समुपस्थितेन श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत- विश्वविद्यालयस्य दिल्लीस्थस्य कुलपतिना आचार्यश्रीमुरलीमनोहरपाठकेन माधवमहिमग्रन्थसमीक्षणपूर्वकं श्रीमाधवदेशपाण्डेवर्याणां प्रशस्ती भाषितं प्रशस्ति पद्यानि च श्रवितानि।

अभिनन्दनप्रतिवचनं च श्रीमाधवदेशपाण्डेवर्येण प्रोक्तम्। तेन स्वगुरूणां श्रीवामनशास्त्रिभागवतीवर्याणां श्रीशिवरामदत्तात्रेय जोशीवर्याणां श्रीरामचन्द्रनारायण- दाण्डेकरवर्याणां श्रीजॉर्जकॉडोनावर्याणां च सश्रद्धमुल्लेख विद्धता तान् प्रति प्रणामाञ्जलिः सम्यगर्पितः। माधवमहिमग्रन्थसम्पादनमण्डलों प्रति चापारमुपकारमसौ अभिव्यञ्जितवान्। कार्यक्रमस्य अध्यक्षेण श्रीपण्डित-विष्णुकान्तशुक्लेन न्यगादि यत् माधवदेशपाण्डेयवर्याणाम् अभिनन्दनं संस्कृत- भाषायाः तत्साहित्यस्य च अभिनन्दनं वर्तते। कार्यक्रमस्य सञ्चालनं धन्यवादज्ञापनं च श्रीमता एकनारायणपौण्डेलेन कृतम्।




## महाकविकालिदासस्य कृतयः साहित्यजगतः अमूल्यो निधिः - डॉ.योगेश्वरी फिरोजिया

डॉ.दिनेश चौबे,उज्जयिनी

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालये कालिदासस्मृतिदिवसमहोत्सवस्य अन्तर्गतं आषाढस्य प्रथमदिवसः आषाढशुक्लप्रतिपदायां साहित्यविभागस्य तत्वावधाने कालिदाससाहित्यस्य चित्राङ्कनम् इति विषये विशिष्टव्याख्यानस्य आयोजनं अभूत्। सारश्वतातिथिः मुख्यवक्त्री च डॉ. योगेश्वरी फिरोजिया, उपनिदेशिका कालिदाससंस्कृताकादमी, उज्जयिनी स्वसम्बोधने उक्तवती यत् महाकविः कालिदासः सम्पूर्णे



विश्वे लोकप्रियः अस्ति। महाकवेः कृतीभ्यः ज्ञायते यत् साहित्यं काव्यं सङ्गीतनृत्यचित्रकलायां अपि तस्य महती रुचिः आसीत् , देशस्य भौगोलिकस्थानस्य विषये च ज्ञानम् आसीत् । हिमालयस्य चित्राङ्कनेन महाकविना तस्य परिचयः दत्तः। अकादमी तस्य काव्येषु वर्णितायाः चित्रकला-परम्परायाः प्रचारार्थ विभिन्न प्रकारकम् आयोजनं करोति। १९७८ स्थापना वर्षदारभ्य अकादमी शास्त्रीयसाहित्यस्य, शास्त्रीयनाट्यस्य, कालिदाससाहित्यस्य च विषये अनुसन्धानं, प्रकाशनं, कृत्वा योगदानं ददाति।

अध्यक्षः कुलगुरुः प्रो. विजयकुमारसीजी उक्तवान् यत् विश्वकविकालिदासस्य काव्येषु सर्वे रसाः मिश्रिताः सन्ति। कालिदासः सम्पूर्णः कविः, कविषु श्रेष्ठः कविः च अस्ति । आषाढ़ शुक्लप्रतिपदायां महाकविः कालिदासस्य काव्येषु उल्लिखितानां प्रसिद्धानां श्लोकानां पाठं कृत्वा श्रद्धांजलिः समर्पयते। कार्यक्रमे कुलसचिवः प्रो. दिलीप सोनीमहोदयः उपस्थितः आसीत्। स्वागतभाषणं परिचयं च साहित्यविभागस्य विभागाध्यक्षेन डॉ. तुलसीदासपरौहामहोदयेन अकरोत्।

विशिष्टसंस्कृतविभागस्य विभागाध्यक्षा डॉ. पूजाउपाध्यायः महाकवेः प्रसिद्धानि श्लोकानि सुमधुरेण कण्ठेन प्रस्तुतवती। कृतज्ञतां च निवेदितवती। व्याख्याने डॉ. शुभम शर्मा, डॉ. उपेन्द्रभार्गवः, डॉ. अनिलमुवेलः,सर्वे प्राध्यापकाः छात्राः च उपस्थिताः आसन्।




अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेल: sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।